श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीब्रह्मपुराणम् ।।

अनुवादकः - डा.श्रीकान्त बायरि

## अध्याय - १

पुरुषोत्तमनमनपूर्वकं ब्रह्मपुराणं प्रारभ्यते । ततः नैमिषारण्यवर्णनम् । तत्र द्वादशवर्षीय यागार्थं मुनिवराः आगताः आसन् । तदैव सूतपुराणिकः तत्रागतः । तदा शौनकादयो महर्षयः ज्ञानकार्यार्थं तं ययाचिरे । तदा सूतः दक्षादीन् प्रति ब्रह्मणा यदुपादिष्टं तस्मात् ब्रह्मपुराणमिति प्रसिद्धम् तदेव पुराणं वक्तुमारेभे ।

आदौ ब्रह्मा प्रजापतीन् प्रति सृष्टिरहस्यं, प्रजापतिसृष्टिं, प्रजासृष्टिं, च सविस्तरं अकथयत् । आदौ मरीचि, अत्रि, अङ्गिरस, पुलहा, पुलस्त्य, क्रतुः वसिष्ठ इत्यादयो सप्तप्रजापतयः । ततः ब्रह्मणः क्रोधात् रुद्रसृष्टिः । ज्ञानात् सनकादीनां सृष्टिः । ततः सिद्धसाध्यानां सृष्टिः । इतः परम् सृष्टिः स्थगिता अभवत् । तदा ब्रह्मा पुनः स्वशरीरं द्विधाकृत्य एकतः पुरुषं, अपरतः स्त्रीरूपं च असृजत् । तयोः मैथुनात् पुनः प्रजासृष्टिं प्रारभत । तदा विष्णुः पृथिवीदिविपर्यन्तं व्याप्तं विराट्रूपं असृजत् । तेन विराट्रूपेण मनुम् असृजत् । सः मनुः प्रजासर्गं प्रारभत इति ।

अध्यायः - २

मनुवंशचरितम् -

ततः आपवत्प्रजापतेः दुहितरं विराट्पुरुषस्य पुत्रः मनुः उपयेमे । स एव मनुः स्वायम्भुवः मनुः । तस्य पत्नी शतरूपा । तयोः वंशानुक्रमिकां अत्र विशदयति ।

स्वायम्भुवमनोः पुत्रः वीरः । तस्य द्वौ पुत्रौ उत्तानपादः, प्रियव्रत इति । तयोः उत्तानपादं अत्रिः दत्तत्वेन स्वीकरोति । उत्तानपादस्य पुत्रः ध्रुवः । त्रिसहस्रदिव्यवर्षपर्यन्तं तपः कृत्वा ध्रुवनक्षत्रं पदमवाप । अस्य पुत्रः वेनः परमदुष्टः । ऋषयः तं क्रोधात् दहुः । ततः ते ऋषयः तस्य दक्षिणबाहुं मथित्वा पृथुं अजीजनत् । सः भूमिं धेनुं कृत्वा तस्याः सर्वान् सम्भारान् दुदोह । तदा देवाः पितरः, यक्षाः सर्वे आगत्य स्वाभीष्टसम्भारान् दुदुहुः । पृथोः वंशे प्राचीनबर्हिष

शुक्रगयादयः षट् पुत्राः बभूवुः । प्राचीनबर्हिः सवर्णानामपत्न्या दशप्रचेतसः जनयामास । ते प्राचेतसः दशसहस्रवर्षपर्यन्तं तपः तप्त्वा तज्जनितज्वालया सर्वान् वृक्षान् अदहत् । तदा चन्द्रः स्वयमागत्य तान् समाश्वस्य स्वपुत्रीं वार्क्ष्येयि तेभ्यः अदात् । तया वार्क्ष्येय्या पुनः दक्षः पुत्रत्वेन अजायत् । ततः सः दक्षः मनुष्यान्, पशुपक्ष्यादीन् पर्वतनद्यादीन् असृजत् । तस्य दक्षस्य पञ्चाशत् पुत्र्यः बभूवुः । तासु दश यमाय, त्रयोदश कश्यपाय, सप्तविंशतिनक्षत्रदेवताः चन्द्राय दत्वा विवाहं कारयामास । दक्षप्रजापतिः इतःपरं स्त्रीपुरुषसंयोगेन सृष्टिक्रियाप्रक्रियां प्रारब्धवान् ।

**वंशनामानुक्रमणिका -**

१. आपवनः - प्रजापतिः

२. शतरूपा - पिता आपवनः , पतिः - स्वायम्भुवमनुः । एषा सहस्रवर्षपर्यन्तं तपः तप्त्वा स्वायम्भुवमनुं पतित्वेन लेभे । पुत्रः - वीरः ।

३. स्वायम्भुवमनुः ।- पिता - विराट् विष्णुः । पुत्रः वीरः । पत्नी शतरूपा ।

४. वीरः - स्वायम्भुवमनोः पुत्रः । माता - शतरूपा । पत्नी काम्यदेवी षट् पुत्राः । १. प्रियव्रत २. उत्तानपादः ३. कुक्षिः ४. विराट् ५. साम्राट् ६. प्रभुः ।

५. काम्यादेवीः - कर्दमप्रजापतेः ज्येष्ठापुत्री । पतिः - वीरः । पुत्राः - षट् - १. प्रियव्रत २. उत्तानपादः ३. कुक्षिः ४. विराट् ५. साम्राट् ६. प्रभुः ।

६. सूनृतादेवी - धर्मराजपुत्री । उत्तानपादस्य पत्नी । ध्रुवस्य माता ।

७. उत्तानपादः - स्वायम्भुवमनोः पुत्रः । माता शतरूपा । पत्नी सूनृतादेवी पुत्रः - ध्रुवः ।

८. प्रियव्रतः - पिता- स्वायम्भुवमनुः । माता - काम्यदेवी । भ्रातरः उत्तानपादः, कुक्षिः, विरट्, साम्राट्, प्रभुः ।

९. कुक्षिः - स्वायम्भुवमनोः पुत्रः । माता = काम्यदेवी । भ्रातरः - प्रियव्रतः उत्तापादः विराट्, सम्राट् , प्रभुः ।

१०. विराट् - पिता - स्वायम्भुवमनुः माता - काम्यदेवी, भ्रातरः - प्रियव्रतः, उत्तानपादः, कुक्षिः, सम्राट्, प्रभुः ।

अध्यायः - २१६

**यमलोकं सुखेन गमनम्** - यदा व्यासः महर्षीन् प्रति यमलोकमार्गः दुःखकरः, पापिनां बहुक्लेशदायकम् इत्यादि दुर्गमं यमलोकमार्गं वर्णयति तदा सर्वे महर्षयः वासं एवं प्रार्थितवन्तः । भगवन् सुखेन यमसदनं गन्तुं उपायः अस्ति वा । अस्ति चेत् कृपया वद इति । तदा व्यासः सुखेन यमलोकं कथं गन्तुं शक्यम् इति वर्णयति ।

अस्मिन् भूलोके यः धर्मसंयुक्तः अहिंसानिरतः गुरुशुश्रूषणे युक्तः, देवब्राह्मणपूजकः सः सुखेन यमलोकं गच्छति ।

तादृशः धर्मिष्ठः नरः काञ्चनध्वजशोभितैः दिव्यैः विमानैः यमसदनं याति । ततः व्यासः केन केन पुण्येन यमलोकं सुखेन गन्तुं शक्यं इति पुण्यकार्याणां समूहं वर्णयति ।

तेषु गोदानजनितपुण्यं, विष्णुदास्यजनितपुण्यं सत्यभाषित्वं पुण्यं इत्यनेककार्यजनितपुण्यानि वर्तन्ते । तानि सर्वाणि अत्र विस्तरेण वर्णितम् ।

तथैव केन केन पुण्येन केन केन यानेन गच्छन्ति नराः इत्यपि विस्तरेण निरूपितं वर्तते । तथैव ये नराः मांसं न भक्ष्यन्ते ते सर्वे सुखने यमलोकं गच्छन्ति इत्यपि वर्णयति । तद्वर्णनसमये मांसभूक्षणं जिह्वायाः मिष्टमपि न भक्षितव्यम् इति व्यासः जगाद । भक्ष्यभोज्यादिकेषु मांसान्मिष्टतरं नास्ति । अतः एव मांसं न भुञ्जीत इति । यतोः मिष्टं सर्वं पारत्रिसुखं प्रतिबन्धकं जिह्वायाः मिष्टं विषयसुखमेव भवति अतः न मांसं जिह्वा चापल्येन भोक्तव्यम् । पुरा ब्रह्मलोके सहस्रगोदानी मांस भक्षी च समाययौ । तदा ब्रह्मा एवम् उवाच । सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलं तत् सर्वं अमांसभक्षणेन प्राप्तुं शक्यते । अतः मांसभक्षणं सर्वदा सर्वथा त्याज्यम् इति । इत्येवं नाना पुण्यफलानि उक्त्वा तादृशान् पुण्य पुरुषान् सर्वान् धर्मिष्ठान् स्वयं यममेव द्वारे समागत्य संमानयति । स्वयमेव तेभ्यः अर्घ्यपाद्यादि दानेन प्रीणयति तथैव यमः तान् प्रति एवं स्तौति । यूयं धन्याः यतो हि अत्मनः हितकारिणः यूयम् । येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् इत्युक्त्वा तान् सम्भारेण सम्मानयित्वा इदं विमानं आरुह्य दिव्यस्त्रीभोगभूषिताः अतुलं सर्वकामसमन्वितं स्वर्गं गच्छध्वम्' इति वदति ।

इतः परम् धर्मस्य श्रेष्ठत्वं, मनुष्यैः स्वजन्मसार्थकाय धर्माचरणं कर्तव्यम् इति धर्मप्रशंशा च कृतम् ।

अन्ते महाविष्णुं नानास्तोत्रैः स्तुत्वा अनेन पुराणश्रवणेन महाविष्णुः सन्तुष्ट सर्वान् अनुगृह्णाति इति व्यासः विष्णुतिपूर्वकेण पुराणं समापयति ।

**विशेषविचरः -**

यमलोकं केन केन पुण्येन सुखेन गन्तुं शक्यम् इति पुण्यकारर्याणां समूहं विस्तारेण वर्णनम् ।

१. ब्राह्मणेभ्यस्तु दानानि ........ (ब्रह्माण्ड.पु.२१६.६-३५)

यमलोकं केन केन प्रकारेण केन केन वाहनेन च गच्छन्ति इति वर्णयति ।

२. जलभाजन धातारः ....... (ब्रह्माण्ड.पु.२१६.६-३५)

मांसभक्षणं सर्वेषु भक्ष्यभोज्येषु मिष्टमपि सर्वथा न भोक्तव्यम् । सर्वतीर्थोद्भवपुण्यं सर्वयज्ञोद्भवं पुण्यं अमांसभक्षणात् भवति ।

३. मांसान्मिष्टतरं नास्ति ............. (ब्रह्माण्ड.पु.२१६.६४-६६)

*****

**अनुवादकः - डा.श्रीकान्त बायरि**